**Ex/Sans/PG/4.4A/2019**

# MASTER OF ARTS EXAMINATION, 2019

(2nd Year, 4th Semester)

**SANSKRIT**

**Course : XIX / A**

**[Sanskrit Drama]**

Full Marks : 30 Time : Two Hours

*The figures in the margin indicate full marks.*

## विभाग - क

१. अधोलिखिताः प्रश्नाः देवनागरीलिपिमाश्रित्य च समाधेयाः।

(क) "भक्त्या कार्यधूरां वहन्ति कृतिनस्ते दुर्लभास्त्वादृशाः" अत्र वक्ता कः? कस्य विषये किमुक्तवान् सः? ½+½+2=3

(ख) "समुदिता येषां गुणा भूतये। ते भृत्या नृपतेः कलत्रमितरे सम्पत्सु चापत्सु च" — कस्य उक्तिरियम्? कमुद्दिश्य वक्ता किमुक्तवान्? अत्र 'गुण' इत्यनेन के उपलभ्यन्ते? ½+½+1+1=3

(ग) आहितुण्डिकः इत्यस्य अर्थः दीयताम्। अत्र आहितुण्डिकः कः? स कुत्र किमर्थमागतवान्? 1+½+½+1=3

२. प्रसङ्गनिर्देशपूर्वकं कस्यचिदेकस्य तात्पर्यं लेखनीयम्। 1×6=6

(क) "विरूद्धयोर्भृशमिह मन्त्रिमुख्ययोर्महावने वनगजयोरिवान्तरे अनिश्चयाद् गजवशयेव भीतया गतागतैर्ध्रुवमिह खिद्यते श्रिया"

[*Turn over*]

**अथवा,**

(ख) परार्थानुष्ठाने रहयति नृपं स्वार्थपरता परित्यक्तस्वार्थो नियतमयथार्थः क्षितिपतिः

परार्थश्चेत् स्वार्थादभिमततरो हन्त परवान् परायत्तः प्रीतेः कथमिव रसं वेत्तु पुरुषः ।

३. अधोलिखिताः प्रश्नाः समाधेयाः ।

(क) 'प्रबोधचन्द्रोदयम्' इति दृश्यकाव्ये प्रथमे अङ्के राजा कः? मत्या सह तस्य राज्ञः संलापस्य विषयसारः समासतः लेखनीयः । ½×4½=2¼

**अथवा,**

(ख) 'प्रबोधचन्द्रोदयम्' इति दृश्यकाव्यस्य तृतीये अङ्के भिक्षु-कापालिक-क्षपणकाणां संलापेषु नाट्यकारः किं वक्तुमिच्छतीति सरलतया वर्णनीयम्।

४. भावार्थः लेखनीयः (कस्यचिद् **द्वयस्य**) — 5×2=10

(क) एकामिषप्रभवमेव सहोदराणामुज्जृम्भते जगति वैरमिति प्रसिद्धम्।

पृथ्वीनिमित्तमभवत् कुरुपाण्डवानां तीव्रस्तथा हि भुवनक्षयकृद्विरोधः ।।

(ख) आत्मास्ति देहव्यतिरिक्तमूर्तिर्भोक्ता स लोकान्तरितः फलानाम्।

आशेयमाकाशतरोः प्रसूनात् प्राथीयसः स्वादुफलप्रसूतौ।

(ग) त्याज्यं सुखं विषयसङ्गमजन्म पुंसां दुःखोपसृष्टमिति मूर्खविचारणैषा।

व्रीहिञ्जिहासति सितोत्तमतण्डुलाढ्यान् को नाम भोस्तुषकणोपहितान् हितार्थी ॥

---